सदा वैश्यः पश्चाद्वै शूद्र आदशेत् । मदकाले तु संप्राप्ते पीड्यमाना महाविषाः । अवेलायां दशन्ते वै मैथुनार्त्ता भुजङ्गमाः । पुष्पगन्धाः स्मृता विप्राः क्षत्रियाश्चन्दनावहाः । वैश्याश्च घृतगन्धा वै शूद्राः मत्स्यगन्धिनः । वासं तेषां प्रवक्ष्यामि यथावदनुपूर्व्वशः । नदीकूपतड़ागेषु गिरिप्रस्रवणेषु च । आरामेषु पवित्रेषु शुचिष्वायतनेषु च । वसन्ति ब्राह्मणाः सर्पा ग्रामद्वारे चतुष्पथे । क्षत्रियो वसते नित्यं तोरणेषु पुरेषु च । गोशालाश्वशालासु पल्वलेषु तटेषु च । गोष्ठेषु पथि वृक्षेषु विप्र ! वैश्या वसन्ति च । अविविक्तेषु स्थानेषु निर्झरेषु वनेषु च । शून्यागारे श्मशाने च शूद्रा विप्र ! वसन्ति च । श्वेताश्च कपिलाश्चैव ये सर्पास्त्वनलप्रभाः । मनस्विनः सात्त्विका ये ब्राह्मणास्ते बुधैः स्मृताः । रक्तवर्णसुवर्णाभाः प्रवालमणिसन्निभाः । सूर्य्यप्रभास्तथा विप्र ! क्षत्रियास्ते भुजङ्गमाः । नानाविचित्रराजीभिरतसीवर्णसन्निभाः । वाणपुष्पसुवर्णाभा वैश्यास्ते च भुजङ्गमाः । काकोदरनिभाः केचित् ये च अञ्जनसन्निभाः । काकवर्णा धूम्रवर्णास्ते शूद्राः परिकीर्त्तिताः । यस्य सर्पेण दष्टस्य दंशमङ्गुलमन्तरम् । बालदष्टं विजानीयात् कश्यपस्य वचो यथा । यस्य सर्पेण दष्टस्य दंशं द्व्यङ्गुलमन्तरम् । यौवनस्थेन दष्टस्य एतद्भवति लक्षणम् । यस्य सर्पेण दष्टस्य सार्द्धद्व्यङ्गुलमन्तरम् । वृद्धदष्टं विजानीयात् कश्यपस्य वचो यथा" भविष्यपु० । "स्थानान्यादौ प्रवक्ष्यामि नद्यां दष्टो न जीवति । चितावल्मीकशैलादौ कूपे च विवरे तरोः । दंशे रेखात्रयं यस्य प्रच्छन्नं स न जीवति । षष्ठ्यांश्च कर्कटे मेषे मूलाश्लेषामघादिषु । कृत्ताश्रीणिगते सन्धौ शङ्खकर्णोदरादिषु । दण्डी शस्त्रधरो भिक्षुर्नग्नादिः कालदूतकः । वक्त्रे बाहौ च ग्रीवायां पृष्ठे च न हि जीवति । पूर्व्वं दिनपतिर्भुङ्क्ते सार्द्धयामन्ततो परे । शेषाः ग्रहाः प्रतिदिनं षट्संख्यापरिवर्त्तनैः । नागभोगक्रमो ज्ञेयो रात्रौ बाणविवर्त्तनैः । शेषोऽर्कः फणिपश्चन्द्रस्तक्षको भौम ईरितः । कर्कोटोज्ञो गुरुः पद्मो महापद्मश्च भार्गवः । शङ्खः शनैश्चरो राहुः कुलिकश्चाह्वयो ग्रहाः । रात्रौ दिवा सुरगुरोर्भोगे स्यादमरान्तकः । पङ्गोः काले दिवा राहुः कुलिकेन सह स्थितः । यामार्द्धसन्धिसंस्थः स वेलां कालयतीश्वरेत् । बाणद्विषड्वह्निवाजियुगभूरेकभागतः । दिवा षड्वेदनेत्रादिपञ्चत्रिवसुखांशकैः । पादाङ्गुष्ठे पादपृष्ठे गुल्फे जानुनि लिङ्गके । नाभौ हृदि स्तनतटे कण्ठे नासापुटेऽक्षणि । कर्णयोश्च भ्रुवोः शङ्खे मस्तके प्रतिपत्क्रमात् । तिष्ठेच्चन्द्रश्च जीवेन पुंसो दक्षिणभागके । कायस्य वामभागे तु स्त्रिया वायुवहक्रमात् । अमृतस्थः स्थितो मोहो निवर्त्तेत च मर्दनात्" गारुड़े १९अ० । "आषाढ़ादित्रिमासैः स्याद् गर्भो मासचतुष्टये । अण्डकानां शते द्वे च चत्वारिंशत् प्रसूयते । सर्पा ग्रसन्ति सूतौ तान् विना स्त्रीं, पुंनपुंसकान् । उन्मीलतेऽक्षि सप्ताहात् कृष्णो मासाद्भवेदहिः । द्वादशाहात् सुबोधः स्याद्दन्ताः स्युः सूर्य्यदर्शनात् । द्वात्रिंशद्दिनविंशत्या चतस्रस्तेषु दंष्ट्रिकाः । कराली मकरी कालरात्री च यमदूतिका । एतास्ताः सविषा दंष्ट्रा वामदक्षिणपार्श्वगाः । षण्मासान्मुच्यते कृत्तिं जीवेत् षष्टिसमाद्वयम् । नागाः सूर्य्यादिवारेशाः सप्त उक्ता दिवानिशि । तेषां षट् प्रतिवारेषु कुलिकः सर्व्वसन्धिषु । शङ्खेन वा महाब्जेन सह तस्योदयोऽथ वा । द्वयोश्चैव नाड़िकयोरन्तरं कुलिकोदयः । दुष्टः सकालः सर्व्वत्र सर्व्वदंशे विनिर्द्दिशेत् । कृत्तिका भरणी स्वातिर्मूलं पूर्व्वत्रयाश्विनी । विशाखार्द्रा मघाश्लेषा चित्रा श्रवणरोहिणी । हस्ता मन्दकुजौ वारौ पञ्चमी चाष्टमी तिथिः । षष्ठी रिक्ता शिवा निन्द्या पञ्चमी च चतुर्द्दशी । सन्ध्याचतुष्टयं दुष्टं दग्धयोगाश्च राशयः । एकद्विबहवो दंशा दष्टविद्धञ्च खण्डितम् । अदंशमवगुप्तं स्याद्दंशमेवं चतुर्विधम् । त्रयो द्व्येकक्षता दंशा वेदना रुधिरं न्यणाम् । नक्तं द्व्येकाङ्घ्रिकूर्म्माभा दंशाश्च यमचोदिताः । दाहो पिपीलिकास्पर्शी कण्ठशोषरुजान्वितः । सतोदो ग्रन्थितो दंशः सविषो न्यस्तनिर्विषः । देवालये शून्यगृहे वल्मीकोद्यानकोटरे । रथ्या सन्ध्या श्मशाने च शुष्कद्रौ सिन्धुसङ्गमे । द्वीपे चतुष्पथे सौधे गृहेऽब्जे पर्वताग्रतः । बिलद्वारे जीर्णकूपे जीर्णवेश्मनि कुड्यके । शिग्रुश्लेष्मातकाक्षेषु जम्बूडुम्बरकेषु च । वटे च जीर्णप्राकारे खास्यहृत्कक्षजत्रुणि । तालौ शङ्खे गले मूर्ध्नि चिबुके नाभिपादयोः । दंशोऽशुभः" अग्निपु० ।

सुश्रुते तद्दंशलक्षणभेदादिर्द्दर्शितो यथा

"तत्र सर्व्वेषां सर्पाणां सामान्यत एव दष्टलक्षणं वक्ष्यामः । किं कारणं विषं हि निशितनिस्त्रिंशाशनिहुतवहदेश्यकारि मुहूर्त्तमप्युपेक्षितमातुरमतिपातयति । न चाव-